# स्पेयिन्-देशे संस्कृतस्य गोष्ठी

## मेड्रिड, १७-१८ आक्टोबरमासम्, २०१७

स्पेयिन्-देशे संस्कृतस्य प्रथमा गोष्ठी

गोष्ठ्याः उद्देश्याः –

भारत-स्पेयिन्-देशयोर्मध्ये संस्कृतभाषायाः अवबोधनसंवर्धन-अभिचेतना-ज्ञानानां प्रामुख्यस्य अभिज्ञानम् ।

विश्वस्य उत्कृष्ठभाषासु अन्यतमत्वेन संस्कृतस्य विकासाय सततप्रयत्नानाम् आवश्यकतायाः महत्त्वदानम् ।

२०१७ तमवर्षस्य मे मासे भारतस्य प्रधानमन्त्रिणः श्रीनरेन्द्रमोदीमहोदयस्य स्पेयिन्-देशयात्रायां "तद्देशे संस्कृतगोष्ठी भवेदिति " स्वीकृतस्य निर्णयस्य अनुसारं द्वयोर्देशयोः विद्वत्समवायः सममिलत्।

२०१७ तमवर्षस्य अक्टोबर्मासे १७-१८ दिनाङ्कयोः मेड्रिडनगरस्थे कामूप्लुटेन्स् इत्याख्ये विश्वविद्यालये द्वयोः देशयोः विदुषां गोष्ठी सम्पन्ना । अस्यां गोष्ठ्याम् अधोलिखिताः निर्णयाः अनुमोदिताः ।

१. वयं संस्कृतस्य प्रथमगोष्ठ्याः समायोजनमिदं स्वागतीकुर्मः, यच्च भारत-स्पेयिन्-देशयोः विद्वद् भ्यः पारस्परिकविचारविनिमयाय समुचितम् अवसरं पर्यकल्पयत् ।

२. साहित्य-कला-धर्म-विज्ञानैः जनजीवनसंवर्धने तथा समरसता-समसंक्षेम-समाविष्टतालक्षणैः समन्वितायाः वैश्विकदृष्टेः विकासे संस्कृतभाषायाः समृद्धपरम्पराणाम् समकालीनप्रासङ्गिकतायाश्च आवश्यकतां वयं निश्चिनुमः।

३. "वयं भारत-स्पेयिन्-देशयोः संस्कृतभारोपीयभाषाणां विद्वत्समवाये चर्चानाम् अग्रेसारणार्थं कटिबद्धाः स्मः" इति प्रतिजानीमहे ।

४. वयं भारत-स्पेयिन्-देशयोः उत्कृष्टसम्बन्धानां तत्रापि विशेषतया संस्कृतविदुषां, सामान्यतया शैक्षिकसमुदायानां च मध्ये सम्बन्धानाम् अग्रेऽपि प्रवर्धने महतीम् आवश्यकताम् अभिजानीमहे ।

५. वयं भारत-स्पेयिन्-देशयोः संस्कृतविदुषां मध्ये सम्बन्धानां संवर्धने अस्माकम् अभिलाषं प्रकटयामः।

६. वयम् अस्याः प्रथमसंस्कृतविद्वद्गोष्ठ्याः संयोजनार्थं समायोजकेभ्यः, गोष्ठीषु योगदानार्थं सर्वेभ्यः प्रतिभागिभ्योऽपि कार्तज्ञ्यम् आविष्कुर्मः ।

७. वयं पत्रमिदं संस्कृतेन वितरणीयमिति प्रार्थयामहे ।

डॉ. खुआन अर्नाव

डॉ. एमिलिओ गारसीआ बुएनदिया

डॉ. मार्कोस दाविद काहले

डॉ. यूज़ेनियो लुजान

डॉ. गिएर्मो रोड्रिग्ज

श्रीमती मॉनिका दे ला फुएन्टे

प्रो. जूलीया मेंडोज़ा

प्रो. वर्जीलियो गआर्सीया ट्रबाज़ो

प्रो. ज़ुआन आंटोनीयो आल्वरेज़-प्ड्रॉसा

डॉ. लीला संपंगेरे रंगचार धारिणी

प्रो. राजेंद्र प्रसाद मिश्रा

प्रो. कमलेश दत्त त्रिपाठी

प्रो. मुरलीधर शर्मा विरिवेंती

70 Years of Freedom

सत्यमेव जयते
Embajada de la India

Facultad
de Filología